International Journal of Sanskrit Research 2015; 1(6): 10-11

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(6): 10-11
© 2015IJSR
www.sanskritjournal.com
Received: 10-07-2015
Accepted: 13-08-2015

संदीप पैन्यूली
शोधच्छात्रः श्रीलालबहादुरशास्त्रीराष्ट्रिय
संस्कृतविद्यापीठम् नवदेहली–110016

**Correspondence**
संदीप पैन्यूली
शोधच्छात्रः श्रीलालबहादुरशास्त्रीराष्ट्रिय
संस्कृतविद्यापीठम् नवदेहली–110016

# सांख्यदर्शने अव्यक्तस्वरूपविमर्शः

## संदीप पैन्यूली

भारतीयाऽऽस्तिकदर्शनेषु सांख्यदर्शनस्यातीव सुविशिष्टं स्थानं वर्तते, अस्य शास्त्रस्य मूलप्रवर्तकाऽऽचार्याः कपिलः समभवन्। सांख्यशब्दस्य व्युत्पत्तिः संख्याशब्देनैवाभूत्, प्रायः गणनार्थकः संख्याशब्द एव सांख्यशास्त्रस्य व्युत्पत्तिकारको वर्तते। सांख्यस्य व्युत्पत्तिविषये लिखितमस्ति। यत् –

**संख्यायन्ते गण्यन्ते तत्त्वानि येन तत् सांख्यम्।**

अर्थात् यस्मिन् शास्त्रे दर्शने वा प्रकृतेः पुरुषपर्यन्तं तत्त्वानि परिगण्यन्ते तच्छास्त्रं सांख्यमित्यभिधीयते। प्रकृतेः नामान्तराण्यपि समुपलभ्यन्ते सांख्यग्रन्थेषु तानि चेत्थमवबोध्यानि प्रसवधर्मिणी, परिणामिनी, तमस्, अक्षरम्, ब्रह्मा, माया, अविद्या, शक्तिः, अजा, क्षेत्रमित्यादीनि।[1] संसारः प्रकृतेः परिणाम इति सांख्यदर्शनस्य पक्षः। सांख्यदर्शनं द्विविधम् निरीश्वरं सांख्यं सेश्वरञ्च। निरीश्वरादिनोऽभिदधति सत्त्वं, रजः, तम इति गुणत्रयी अचेतना प्रकृतिः महदादि विशेषतत्त्वेभ्यः प्रपञ्चरूपेण चेतनव्यक्तीनामुपभोगाय परिणमति। सेश्वरवादिनो (योगाचार्याः) अप्येवमेवाभिदधति परमेतावद् वैशिष्ट्यमवश्यमस्ति। इयं पुरुषापरपर्यायस्येश्वरस्याश्रयेण जगद्रचनायां प्रवर्तते। सुक्षेत्रपतितं बीजसम्पर्काद् अङ्कुरादिक्रमेण वृक्षरूपेणपरिणमति, तथैव सर्वव्यापकस्येश्वरस्याश्रयेण प्रकृतिर्महदहङ्कारतन्मात्रादिक्रमेण परिणमन्ती विशेषान्तं प्रपञ्चमारभते। इयमेव प्रकृतिमूला सृष्टिः ईश्वरस्तु निमित्तमात्रम्। प्रकृतिरियं सर्वत्रैकैव भोक्तारोऽनेके। अत एव बन्धनमुक्त्यादि व्यवस्थोपपद्यते। इदमेव शास्त्रसम्मतमप्यस्ति।

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।।**[2]

सांख्यदर्शने यानि पञ्चविंशतितत्त्वानि वर्णितानि तेष्वेवैकं तत्त्वं प्रकृतिस्वरूपकमस्ति। सप्ततत्त्वानि प्रकृतिविकृतिस्वरूपाणि वर्तन्ते, षोडशतत्त्वानि केवलं विकारस्वरूपाणि स्वीक्रियन्ते, एकतत्त्वमनुभवस्वरूपं वर्तते, एतानिपञ्चविंशतितत्त्वानि निगदितानीति।

**अष्टौ प्रकृतयः।**[3]
**प्रकृतिर्बुद्ध्यहङ्कारौ तन्मात्रैकादशेन्द्रियम्।**
**भूतानि चेति सामान्याच्चतुर्विंशतिरेव ते।।**

प्रकृतितत्त्वं च साक्षात्परम्परयाखिल विकारोपादानत्वम् वर्तते। व्युत्पत्तिस्तु प्रकृतिपरिणामरूपा इति। सा च शान्तघोरमूढादिरूपाणामपि असमुदायवद्रूपत्वेपि अतिशयैः समुदायवद्भिरविरोधेन वर्तमानत्वे सामान्यात्मना गुणभावोऽतिशयात्मना प्राधन्यं विशेषात्मना वैषम्यमित्यतो न्यूनाधिकभावेनासंह्रतावस्थाऽकार्यावस्थेति यावत्। महदादिकं तु कार्यसत्त्वादिकं न कदाप्यकार्यावस्थं भवतीति तच्चावृत्तिः। वैषम्यावस्थायामपि प्रकृतित्वसिद्धये उपलक्षितमित्युक्तं सत्त्वादिगुणवती प्रकृतिः सत्त्वाद्यनतिरिक्तत्वात् तथा च सूत्रं सत्त्वादीनामतद्धर्मत्वं तद्रपूत्वादिति सत्त्वादीनां प्रकृतिस्वरूपत्वं न तु प्रकृतिधर्मत्वम्। गुणेभ्यः एव सर्वकार्योपपत्तौ तदन्यप्रकृतिकल्पनावैयर्थ्यात्। सूत्रभाष्याभ्यामपि तथोक्तत्वात्। यत्तु प्रकृतेर्गुणा इतिवद् वनस्य वृक्षा इतिवद् व्यष्टिसमष्ट्यभिप्रायेणेति सत्त्वं रजस्तम इति प्रकृतेरभवन् गुणा इति च न सत्त्वादीनां प्रकृतिकार्यवत्ववचनं गुणनित्यतावाक्यविरोधेन महत्तत्वकारणीभूतकार्यसत्त्वादिपरम्। महदादिसृष्टिः गुणवैषम्यात्। अन्यग्रन्थे नैकेषु स्थलेषु प्रकृतिवर्णनमस्ति। यत् –

**अव्यक्तबुद्ध्यहङ्कारास्तन्मात्राणां च पञ्चकम्।**
**अष्टौ प्रकृतयस्त्वेताः सप्त च व्यक्तामियात्।।**
**अव्यक्तप्रकृतिजन्यत्वादव्यक्तानीति चोच्यते।**
**व्यज्यन्ते च यथा लोके घटाद्या न तथा हि तत्।।**
**अव्यक्तं प्रकृतिर्माया प्रधानं ब्रह्म कारणम्।**
**अव्याकृतं तमः पुष्पं क्षेत्रमक्षरनामकम्।।**
**बहुधात्मकादिनामानि तस्यामी ते जगुर्बुधाः।**
**व्यज्यते नेन्द्रियैर्यस्मादव्यक्तमत उच्यते।**
**अनादिमध्यनिधनान्निरङ्गत्वेन तत् तथा।**

तदेवाह श्रुतिः –

**अशब्दमस्पर्शनरूपमव्ययं यथा च नित्यं रसगन्धवर्जितम्।**
**अनादिमध्यं महतः परं ध्रुवं प्रधानमेतत् प्रवदन्ति सूरयः।।**इति
**तस्मादलिङ्गकं सूक्ष्मं तथा प्रसवधर्मिकम्।**
**एकं साधारणं तत्र कार्यं कस्यापि नेतरे।।**
**बुद्धिर्महान् मनो ब्रह्मा मतिः ख्यातिरपूर्वकम्।**
**प्रज्ञा भूतिर्धृतिर्ज्ञानं सन्ततिः स्मृतिरित्यपि।।**
**हिरण्यगर्भ्य बुद्धेस्तु महतो नाम सूचितम्।**
**गुणेभ्यः क्षोभ्यमाणेभ्यस्त्रयो वेदा विजज्ञिरे।।**
**एका मूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः।**
**विष्णुरेवादिसर्गेषु स्वयंभूभवति प्रभुः।।** इति

अत्र सत्त्वाद्यंशत्रयेण महतो देवतात्रयोपाधित्वात्तदविवेकेन तिस्रः इति। सात्विकांशात् प्रधानात् तु महत्तत्त्वमजायत इति महत्त्वस्य प्राधान्येन चाध्यवसायो वृत्तिर्महदहङ्कारमनस्त्रितयात्मकस्यान्तः करणवृक्षस्य महत्त्वत्वं बीजावस्था तदुक्तं सांख्यसूत्रे इदमेव महत्त्वत्त्वमंशतो रजस्तमः संभेदेन परिणतं सत् व्यष्टिजीवानामुपाधिरधर्मादियुक्तं क्षुद्रमपि भवति महदुपरागाद्विपरीतमिति। महतस्त्रिगुणस्वरूपत्वोद्देहस्य देहिना कालरूपविष्णुना क्षोभ्यदशायां गुणरूपोपाधिप्राधान्यादविवेके ब्रह्मविष्णुशिवत्वं तत्र महान् सुषुप्त्यभिमानी शिवस्तदुपाधिस्तमः कार्यरूपी तत्र स्वप्नाभिमानी विष्णुस्तदुपाधिः कार्यसत्त्वं तत्र जाग्रदभिमानी ब्रह्मा तदुपाधिः कार्यरजः तत्र समुदायसमुदाय्यनन्यन्यायेन समष्टेर्व्यष्ट्यनन्यत्वान्मशकादिरपि विष्णुरेवेति भावः। सृष्टिस्तु महदादिक्रमेणैव न तु भूतादिक्रमेणेति। प्रकृतिवास्तवे च पुरुषस्याध्याससिद्धिः।[4] प्रकृतौ स्रष्टृत्वस्य वस्तुत्वे च सिद्धे पुरुषस्य स्रष्टृत्वाध्यास एव श्रुतिषु सिद्धयति, उपासनायामेव श्रुतेस्तात्पर्यात्। 'अजामेका' (श्वे. उ. 4/5) मित्यादिश्रुत्यन्तरेण प्रकृतेः स्रष्टृत्वसिद्धेः पुंसां कूटस्थ चिन्मात्रताबोधक श्रुत्यन्तरविरोधच्चेत्यर्थः।

**भेदानां परिमाणात्, समन्वयात् शक्तितः प्रवृत्तेश्च।**
**कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य।।**[5]
**कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदयाच्च।**
**परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्।।**[6]

भेदानां विशेषाणां महदादीनां भूम्यन्तानां कार्याणां कारणं मूलकारणम् अव्यक्तम्। कुतः? 'कार्यकारणविभागदविभागाद् वैश्वरूप्यस्य'। कारणे सत्कार्यमिति स्थितम्। तथा च यथा कूर्मशरीरे सन्त्येवङ्गानि निःसरन्ति विभज्यन्ते। इदं कूर्मशरीरमेवान्ये तस्याङ्गानि इति। एवं विविशमानानि तस्मिन्नव्यक्ती भवन्ति। एवं कारणान्मृत्पिण्डाद् हेमपिण्डाद्वा कार्याणि घटमुकुटादीनि सन्त्येवार्विभवन्ति। विभज्यन्ते। सन्त्येव च पृथिव्यादीनि कारणात् तन्मात्रादाविर्भवन्ति विभज्यन्ते। सन्त्येव च तन्मात्राण्यहङ्कारात् कारणात् सन्नेवाहङ्कारः कारणान्महतः सन्नवे च महान् परमाव्यक्तात्। सोऽयं कारणात् परमाव्यक्तात् साक्षात् पारम्पर्येणान्वितस्य विश्वस्य कार्यस्य विभागः। प्रतिसर्गे तु मृत्पिण्डं स्वर्णपिण्डं वा घटमुकुटादयो विशन्तो अव्यक्तीभवन्ति। तत्कारणरूपमेवाऽनभिव्यक्तं कार्यमपेक्ष्याव्यक्तं भवति। एवं पृथिव्यादयस्तन्मात्राणि विशन्तः स्वापेक्षया तन्मात्राण्यव्यक्तयन्ति। एवं तन्मात्राण्यहङ्कारं विशन्त्यहङ्कारमव्यक्तयन्ति एवमहङ्कारो महान्तमाविशन् महान्तव्यक्तयति महान् प्रकृतिं स्वकारणमाविशन् प्रकृतिमव्यक्तयति।

सांख्यशास्त्रे वर्णितं पञ्चविंशति तत्त्वानामुत्पत्तिः मूलकारणं प्रकृतिः (अव्यक्तम्) अस्ति। सा मूलप्रकृतिरेव प्रधानमस्ति। सा प्रकृतिः त्रिगुणात्मिका वर्त्तते। यथा एते गुणाः प्रधानशब्दवाच्या[7] भवन्ति इति। **सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः**[8] इति सांख्यसिद्धान्तं प्रसिद्धे।

**संदर्भग्रन्थसूची**


1. सांख्यसंग्रहः
2. सांख्यकारिका, 3
3. सांख्यसंग्रहः सांख्यतत्त्वविवेचनम् ।
4. प्रकृतौ एव वस्तुतः कर्तृत्वमस्ति।
5. सां. का. कारिका 15
6. सां. का. कारिका 16
7. पा. यो. सू. 2 पा. 18 सू.
8. सांख्यसूत्र 1/41